[ப-ரை] (எந்த வீட்டில்) (1) வீட்டுக்காரியானவள், (2) வீட்டுச் சுவர்கள்-வீடு முதலியவற்றை நாசம் செய்பவளோ, (3-4-5) பூஜிக்கத்தகுந்தவளாகவும் இல்லையோ, (6-7) அவ்வீட்டை, (8) அடைந்து, (9-10 எக்காலமும், (11) ஸந்தோஷமுள்ள மனத்தினராய், (12) நீர் வாஸம் செய்யலாம்.

1 2 3 4 5
यत्र कण्टकिनो वृक्षाः यत्र निष्पाववल्लरी ।
8 7 6 9 10 11 12
ब्रह्मवृक्षश्च यत्रास्ति सभार्यस्त्वं समाविश ॥ ३० ॥

யத்ர கண்டகிநோ வ்ருக்ஷா: யத்ர நிஷ்பாவவல்லரீ ।
ப்ரம்மவ்ருக்ஷச்ச யத்ராஸ்தி ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] (1) எந்த வீட்டில் (2) முள்ளுடைய (3) மரங்கள் இருக்கின்றனவோ (4) எந்த வீட்டில் (5) மொச்சைக்கொடி இருக்கிறதோ (6-7) எந்த

வீட்டில் (8) பிரம்மவிருக்ஷம் (அத்திமரம்—பலாசமரம்) (9) இருக்கிறதோ (அங்கு) (10) மனைவியுடன் (11) நீர் (12) பிரவேசிக்கலாம்.

3 4 5 6 1 2
अगस्त्यार्कादयो वापि बंधुजीवो गृहेषु वै ।
7 8 12 9 10 11
करवीरो विशेषेण नन्द्यावर्तमथापि वा ।
15 14 13 16 17 18
मल्लिका वा गृहे येषां सभार्यस्त्वं समाविश ॥ २१ ॥

அகஸ்த்யார்க்காதயோ வாபி பந்துஜீவோ க்ருஹேஷு வை ।
கரவீரோ விசேஷேண நந்த்யாவர்த்தமதாபி வா
மல்லிகா வா க்ருஹே யேஷாம் ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] *(1-2) (எவர்களுடைய) வீடுகளில் (3-4-5) அகத்தி-எருக்கன் முதலிய செடிகள் (இருக்கின்றனவோ) (6) பந்துஜீவம் என்னும் செடி இருக்கின்றதோ (7) அரளிச் செடி (8) சிறப்பாக (9-10-11) மேலும் (12) நஞ்சாவட்டைச் செடி உளதோ (13-14) எவர்களுடைய வீட்டில் (15) மல்லிக்கொடி உளதோ (அங்கு) (16) மனைவியுடன், (17) நீர் (18) பிரவேசிக்கலாம்.*

5 6 7 1 8 9 4 3 10 2
कन्या च वै यत्र वल्ली द्रोही वा च जटी गृहे ।
13 12 11 14 15 16
बहुला कदली यत्र सभार्यस्त्वं समाविश ॥ ३२ ॥

கந்யா ச வை யத்ர வல்லீ த்ரோஹீ வா ச ஜடீ க்ருஹே.
பஹுலா கதலீ யத்ர ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] *(1-2-3-4) எந்த வீட்டில். (5-6-7) கற்றாழை (உளதோ) (8) ஓமச் செடி உளதோ. (9) த்ரோஹம் செய்பவன் இருக்கிறானோ, (10) இரளி மரம் உளதோ. (11) எந்த வீட்டில் (12) வாழைமரம் (13) அதிகமாயுள்ளதோ (அங்கு) (14) மனைவியுடன் (15) நீர் (16) பிரவேசிக்கலாம்.*

1 2 3 4 5 6 7
तालं तमालं भल्लातं तिंत्रिडी खण्डमेव च ।
8 9 10 11 12 13 14
कदंबः खादिरं वापि सभार्यस्त्वं समाविश ॥ ३३ ॥

தாலம் தமாலம் பல்லாதம் தித்திடீ கண்டமேவ ச।
கதம்ப: காதிரம் வாபி ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] *(எந்த வீட்டில்) (1) பனைமரம், (2) பச்சிலைமரம், (3) சேராமரம் (சேங்கொட்டை மரம்) (4) புளியமரம், (5-6-7) ஒருவகை கரும்பு (8) கடம்ப மரம், (9-10-11) கருங்காலி மரம், (இவை இருக்கின்றனவோ அங்கு) (12) மனைவியுடன் (13) நீர் (14) பிரவேசிக்கலாம்.*

3 4 2 1 5 6 7 8
न्यग्रोधं वा गृहे येषा मश्वत्थं चूतमेव वा ।
9 10 11 12 13 14
उदुंबरं वा पनसं सभार्यस्त्वं समाविश ॥ ३४ ॥

ந்யக்ரோதம் வா க்ருஹே யேஷாமச்வத்தம் சூதமேவ வா।
உதும்பரம் வா பநஸம் ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] *(1) எவர்களுடைய (2) வீட்டில், (3-4) ஆலமரம், (5) அரசமரம், (6-7-8) மாமரம், (9-10) அத்திமரம், (11) பலாமரம் (இவை இருக்கின்றனவோ, அங்கு) (12) மனைவியுடன் (13) நீர் (14) பிரவேசிக்கலாம்.*

3 4 2 1 5 6
एका दासी गृहे यत्र त्रिगवं पञ्चमाहिषम् ।
7 8 9 10 11
षडश्वं सप्तमातङ्गं सभार्यस्त्वं समाविश ॥ ३५ ॥

ஏகா தாஸீ க்ருஹே யத்ர த்ரிகவம் பஞ்சமாஹிஷம்।
ஷடச்வம் ஸப்தமாதங்கம் ஸபார்யஸ்த்வம் ஸமாவிச ॥

[ப-ரை] *(1) எந்த (2) வீட்டில் (3) ஒரு (4) வேலைக்காரி (இருக்கிறாளோ) (5) மூன்று எருதுகள் (6) ஐந்து எருமை மாடுகள் (7) ஆறு குதிரைகள் (8) ஏழு யானைகள் (இவை இருக்கின்றனவோ) அங்கு (9) மனைவியுடன் (10) நீர் (11) பிரவேசிக்கலாம்.*

1 3 2 4 5 7 6
यस्य काली गृहे देवी प्रेतरूपा च डाकिनी ।
11 8 9 10 12 13 14
क्षेत्रपालोऽथवा यत्र सभार्यस्त्वं समाविश ॥ ३६ ॥

யஸ்ய காளீ க்ருஹே தேவீ ப்ரேதரூபா ச டாகிநீ ।
க்ஷேத்ரபாலோ தவா யத்ர ஸபார்யஸ்த்வம் ஸமாவிச

[ப-ரை] (1) எவனுடைய (2) வீட்டில் (3-4) காளீதேவியும், (5) ப்ரேதவடிவமான (6-7) டாகிநியும் (இருக்கின்றனரோ) (8-9) அல்லது (10) எங்கு (11) * க்ஷேத்ரபாலன் என்னும் தேவதை இருக்கின்றதோ (அங்கு) (12) மனைவியுடன் (13) நீர், (14) பிரவேசிக்கலாம்.

शयनासनकालेषु भोजनाटनवृत्तिषु ।
येषां वदति नो वाणी नामानि च हरेः सदा ॥
तद्गृहं ते समाख्यातं सभार्यस्य निवेशितुम् ३७ ॥

சயநாஸநகாலேஷு போஜநாடநவ்ருத்திஷு ।
யேஷாம் வததி நோ வாணீ நாமாநி ச ஹரே: ஸதா ।
தத்க்ருஹம் தே ஸமாக்யாதம் ஸபார்யஸ்ய நிவேசிதும் ॥

[ப-ரை] (1) படுக்கும் பொழுதும்—உட்காரும் பொழுதும், (2) உண்ணும் பொழுதும், ஸஞ்சாரம் செய்யும் பொழுதும் (3) எவர்களுடைய (4) வாக்கு, (5) ஸ்ரீமந்நாராயணனுடைய (6-7) திருநாமங்களை (8) எக்காலமும், (9-10) சொல்லவில்லையோ (11) அவர்களுடைய வீடு (12) மனைவியுடன் கூடிய (13) உமக்கு (14) வஸிப்பதற்காக (15) ஏற்படுத்தப்பட்டது.

पाषण्डाचारनिरताः श्रौतस्मार्तबहिष्कृताः ।
विष्णुभक्तिविनिर्मुक्ता महादेवविनिन्दकाः ।
नास्तिकाश्च शठा यत्र सभार्यस्त्वं समाविश ॥ ३८ ॥

பாஷண்டாசார நிரதா: ச்ரௌதஸ்மார்த்தபஹிஷ்க்ருதா: ।
விஷ்ணுபக்திவிநிர்முக்தா மஹாதேவவிநிந்தகா:
நாஸ்திகாச்ச சடா யத்ர ஸபார்யஸ்த்வம் ஸமாவிச ॥

* க்ஷேத்ரபாலன் என்னும் தேவதை 49 விதமானது. இதன் மந்திரங்கள் பூஜா விவரங்கள் எல்லாம் ப்ரயோகஸாரம்-நிபந்தம் மந்த்ரதேவ ப்ரகாசிகா-தந்த்ரஸாரம்-முதலான நூல்களில் விஸ்தாரமாகக் கூறப்பட்டுள்ளன.

॥ श्रीः ॥

॥ चतुर्थोऽङ्कः ॥

(प्रविश्य)

कञ्चुकी — अहो! मुग्धता दनुजराजस्य। इदमपि न ज्ञायते। येन वधूसनाथेन युयुत्सुना दानवनगरोपवनविहारिणा कंसारिणा सकलमपि दानवकुलं तृणाय मन्यते। यतः—

एको जनो बलहृतादितिकुण्डलाभ्यां
कर्णौ विभूषयति हन्त! कृतापराधः।
तत्सन्ततिश्रवणदारणनाद एष
आकर्ण्यते दनुजसूदनपाञ्चजन्यः ॥ १ ॥

(वेत्रयष्टिं दृष्ट्वा विहस्य)

यदासीद्दैत्येन्दोरहमहमिकाक्रान्तमनसां
प्रणामे देवानां प्रहरणकृतास्फोटशिखरम्।
सृगालानामेतन्निहतदनुभूसैनिकवपू-
रसज्ञानां रोधे किमु परिणमेद्वेत्रमिह नः ॥ २ ॥

(विचिन्त्य) वयमपि युद्धसन्नद्धा भवामः। (पुनर्विचिन्त्य) मा मैवम्।

न चापस्यारोपे भवति भुजसारो न धनुषो
दृढग्राहे मुष्टिः प्रभवति चलस्थाविरवशात्।
न नेत्रे कुर्वाते निजपरविवेकं समुदितं
न शूराणां नाम श्रवणमपि गृह्णाति समरे ॥ ३ ॥

किमनया चिन्तया? सर्वं महाराज एव समीकरिष्यति। अथवा शुद्धान्तगतो महाराजोऽपि किं करिष्यति? (आकाशे कर्णं दत्वा) अहो! किमिति श्रूयते? 'प्रबुद्धो महाराजस्सभामध्यास्ते' इति। तदिदं युज्यते।

चरीकरीति भेरीयं रोदोरोधकरं रवम्।
अमन्दा वन्दिवृन्दानां जयन्ति विजयोक्तयः ॥ ४ ॥

अतस्तावत्साधयामि स्वामिसन्दर्शनाय, यावदसौ समराय सन्नह्यति। (आकाशे कर्णं दत्वा) अहो! कोऽयं कलकलः कवलयति दिङ्मण्डलम्? (विचिन्त्य) आः! ज्ञातम्।

आरब्धं दनुजैस्सयादवभटैरायोधनं दीपितै-
राक्रान्तं नलकैस्स्फुरद्रुमडिमैराग्नेयबाणैरपि ।
सान्द्रैरम्बरमालिखद्भिरभितः पांसूत्करैस्संकुलं
दावोद्दामसमुज्ज्वलद्यवफलारण्यश्रियं गाहते ॥ ५ ॥

अपि च —

प्रियेषून्मत्तेषु प्रधनकृतयात्रेषु परितः
पुनस्तद्व्यावृत्तेस्समरधरणेरीक्षणकृते ।
पुरीयं प्राकारप्रतिशिखरदत्ताननवधू-
जनाक्षिद्रोण्यग्रस्रवदविरळास्रोरुपरिघा ॥ ६ ॥

(परितोऽवलोक्य) समरनिहतसैनिकमांसलुब्धाः इतस्ततस्संचरन्ति यातुधानाः। (पुनर्विचिन्त्य) कष्टं कष्टम् । नाद्यापि देवस्समरधरणिमवतरति । यावदमुमुदन्तमवधारयामि ।

(इति निष्क्रान्तः ।)

(ततः प्रविशति राक्षसः)

राक्षसः — (आत्मगतं) कुदो गए लंबाहळा ? एत्थवि ण दीसइ । तं सद्दावेमि । (प्रकाशं) लंबाहळे! लंबाहळे !! [(आ)कुतो गता लंबाधरा ? अत्रापि न दृश्यते । तां शब्दापयामि । (प्र) लंबाधरे ! लंबाधरे !!]

(प्रविश्य)

राक्षसी — मं पिओ विअ सद्दावेइ । (उपसृत्य विलोक्य) मं वि मोत्तूण कुदो गए तुमं [1]एक्के एव्व शंकुकेशे ? [मां प्रिय इव शब्दापयति । (उपसृत्य विलोक्य) मामपि मुक्त्वा कुतो गतस्त्वं एक एव शंकुकेश ?]

शङ्कुकेशः — अहगे जाअवदाणवबलाणं शिद्धवअणादो शमळकम्मं [2]शुणिअ पळळलोहेण शमागए । तदा तुमं वि गवेशिए । ण उण दिट्ठे । कुदो गए ? [अहं यादवदानवबलानां सिद्ध-वचनात् समरकर्म श्रुत्वा पलललोभेन समागतः । तदा त्वमपि गवेषिता । न पुनर्दृष्टा । कुतो गता ?]

लंबाधरा — जण्णाशिरजणशिणा णळअदणुअणाहेण आरब्धम्मि दुग्गा(दे)वीमहूसवे पळळ[3]पसादपरव-सदाए [4]विज्झाअळं पविट्ठोह्मि । तत्थ ऊशवणिशामणशमाअदाहिंतो शूळाहिंतो एत्थ

1. एक्केणव्व — क-पाठः । 2. शुणुअ-क-पाठः । 3. पशाद — क पाठः । 4. परवसदादो क-पाठः ।

आळ्ध्धं जुध्धं आअण्णिअ ओदालिअं तुमं उवलध्धुं आअदह्मि । [जन्यशिरोजयैषिणा नरकदनुजनाथेन आरब्धे दुर्गा(दे)वीमहोत्सवे पललप्रसादपरवशतया विंध्याचलं प्रविष्टाऽस्मि । तत्र उत्सवनिशामनसमागतेभ्यः शूरेभ्यः अत्र आरब्धं युद्धं आकर्ण्य अवतीर्णं त्वां उपलब्धुं आगतास्मि] ।

शङ्कु — (स्मितं कृत्वा) अहगे शोअळपूळणत्थं ण वळं शमागए । किंदु गअणाशिआए [1] कुमळीए पाणिग्गहणमहूसवशाहणाणि लुहिळमंशप्पाअवत्थूणि लध्धुंवि । [अहं स्वोदरपूरणार्थं न परं समागतः । किन्तु गजनासिकायाः कुमार्याः पाणिग्रहणमहोत्सवसाधनानि रुधिरमांसप्राय-वस्तूनि लब्धुमपि] ।

लंबा — (सहर्षं) होदु । कुदो दे जादो ? [भवतु कुतस्ते जातः ?]

शङ्कु — गअणाशिआवळत्थं काशीउळवाशि[2]मुध्धचंदशेहलच्छत्तधाळअं लंबोअळं आणेदुं गए । [गजनासिकावरार्थं काशीपुरवासिमुग्धचन्द्रशेखरच्छत्रधारकं लम्बोदरं आनेतुं गतः ।]

लंबा — होदु । अज्ज किं शंपाइदे ? [भवतु, अद्य किं संपादितम् ?]

शङ्कु — एक्केक्कश्श शहश्शे मणुअतुळङ्गमकळिन्दमंशाणं ।
मेदशिणेहघडाणं णहु गणिए तहअ लुहिळकुंभाणं ॥ ७ ॥
[एकैकस्य सहस्रं मनुजतुरङ्गमकरीन्द्रमांसानाम् ।
मेदस्स्नेहघटानां न खलु गणितं तथा च रुधिरकुम्भानाम् ॥]

लंबा — (स्मितं कृत्वा) णाह ! एक्कश्श दिअहश्श तुह एक्कश्शवि एदे ण वळिअन्ते । [नाथ ! एकस्य दिवसस्य तव एकस्यापि एतानि न पर्याप्तानि] ।

शङ्कु — पुढमशमाअअशोणिअशमळ[3]शंपाइअए एदे । अज्ज शाअं शमए जहुणाहश्श मुळह-अवअणपंचअणणिशुंभमुहेहिं महंते कळहे भविश्शइ । तदा तुह जह मणळहे तह शंपाएमि । [प्रथमसमागतशोणितसमरसंपादितकान्येतानि । अद्य सायंसमये यदुनाथस्य मुर-हयवदनपंचजननिशुंभमुखैः महान् कलहो भविष्यति । तदा तव यथा मनोरथः तथा संपादयामि ।]

लंबा — णेदे भविश्शइ । जं णेण णळअदाणवेण पूआविहिणा पशण्णे भूअणाहे दुग्गा(दे)वीअ शमळ-शहाअत्थं विआ ।

1. कुमुळीए क-पाठः ।
2. क. मातृकायां ‘ मुग्ध ’ पदं नास्ति ।
3. शंपाइए-क-पाठः ।

[नेदं भविष्यति। यत् अनेन नरकदानवेन पूजाविधिना प्रसन्ने भूतनाथे दुर्गा(दे)वी च समरसहायार्थं वृता।]

शङ्कु — (चिन्तां नाटयति)

(प्रविश्य)

राक्षसपुत्रः — (विलोक्य) एत्थ एव्व कहं मादा पिदलाअ? [अत्रैव कथं माता पिता च?]

शङ्कु— जाद! शुप्पकण्ण! किंणु आअए लंबोअले? [जात! शूर्पकर्ण! किन्तु आगतो लंबोदरः?]

शूर्प — किंति कहेमि? अज्ज किच्चआणिमित्तं चक्कपाणिणा अणुप्पेशिएण चक्केण शव्वत्थ शंदीविए काशीउले कुदोवि कंदिशीए दुग्गा(दे)वीशणाहे भूअणाहे। ता ण दिट्ठे महोअले। [किमिति कथयामि? अद्य कृत्यानिमित्तं चक्रपाणिना अनुप्रेषितेन चक्रेण सर्वत्र सन्दीपिते काशीपुरे, कुतोऽपि कांदिशीको दुर्गा(दे)वीसनाथो भूतनाथः। तस्मात् न दृष्टो महोदरः।]

शङ्कु — होदु। जदो कुदोवि गए। तस्सिं खणे [1]आगमिस्संति तेण कहिदं। ता ण किंवि अदिक्कंतं। [भवतु। यतः कुतोऽपि गतः। तस्मिन् क्षणे आगमिष्यामीति तेन कथितम्। तत् न किमप्यतिक्रान्तम्।]

लंबा — (सहर्षम्) अणुऊलेण विहिणा अह्मे अणुगहिदा। (आकाशे दृष्ट्वा) णहगआएदे णारअपव्वआअ। ता इदो णिग्गच्छंताणं णलअलक्खिआणं सेणिआणं अणुपदं गमिअ बहूणि वत्थूणि शंपादेमो।

[अनुकूलेन विधिना वयं अनुगृहीताः। (आकाशे दृष्ट्वा) नभोगतावेतौ नारद-पर्वतौ च। तत् इतो निर्गच्छतां नरकरक्षितानां सैनिकानां अनुपदं गत्वा बहूनि वस्तूनि संपादयामः। (इति निष्क्रान्ताः।)

॥ मिश्रविष्कंभः ॥

---

1. आगमिस्संदिति-क-पाठः।

(ततः प्रविशति नारदः पर्वतश्च ।)

नारदः — (अधो दृष्ट्वा)

प्राग्ज्योतिषनगरीयं नायकतामेति मेदिनीकान्त्याः ।
बाहार्गळेन गुप्ता दनुजेशितुरप्युरःकवाटेन ॥ ८ ॥
समरपरिशीलनकृते त्रिदशपुरीमेव कुर्वते [1]खुरळीम् ।
अत्र खलु दैत्यडिंभा गात्रधृतेन्द्रगजकुम्भसिंदूराः ॥ ९ ॥
अनवरतमश्रुपातैरारक्तदृशा सहस्रनेत्रेण ।
बन्दीकृतेन पुनरियमनियन्त्रणदीपयन्त्रभूषेव[2] ॥ १० ॥

अये ! पर्वत ! सर्वथा स्वाच्छन्द्यमानन्दकन्दः । तन्निरोधः प्रभूणामनुरोधः । येन वलमथनानुगमानुपालनेन वितथीकृतमस्मदागमनम् । इदमपि कदनं वनकौमुदीकृतम् ।

पर्वतः — भगवन् ! न समापित मिद मधुनापि ।

नारदः — (सगद्गदं) सखे ! चिरप्रवृत्तोऽयं संग्रामः ।

पर्वतः — (आत्मगतं) कलहजीवातुरेष जीवः । (प्रकाशं सपरिहासं हस्तं तदुरसि निधाय) भगवन् ! मा भैषीः । मा भैषीः । अद्यतनमेवेदं प्रधनम् । यदुत,

सान्द्रैराग्नेयबाणैस्सरभसमखिलं व्योम रुन्धन्ति योधाः
ज्वालामाला वमद्भी रणहतपदगप्राणवातातिलुब्धैः ।
पादन्यासाभिभुग्नक्षिततलविवरादम्बरे निस्सरद्भिः
पातालात्रासखिन्नैर्भुजगपरिवृढैर्भूरिफूत्कारभाग्भिः ॥ ११ ॥

अपि च —

सर्वप्रतिभयैश्शब्दैर्योधा नळकधारिणः ।
हसन्ति यत्नसंरुद्धनिमेषा नाकयोषितः ॥ १२ ॥

नारदः — तदिदं युज्यते । अतस्सुखितमिव मे हृदयम् ।

पर्वतः — नरकासुरो नाद्यापि समरधरणिमवतरति । अमी च तत्प्रेषितास्सेनापतय इव दृश्यन्ते । सकलभुवनसञ्चारिणा तत्रभवता त एते संज्ञया ज्ञापनीयाः ।

नारदः — (अंगुल्या निर्दिशन्)

योऽसौ चर्मकृपाणपाणिरुपरि भ्राम्यन् पतन् भूतले
लक्ष्यालक्ष्यतनुश्शिरांसि शतशश्छिन्दन्त्रिपुक्ष्माभृताम् ।

---

1. खुरली – शराभ्यासभूमिः । 2. भवतीति शेषः ।

विष्वग्दर्शितलाघवो वितनुते पाटच्चरप्रक्रमं
दैत्येन्द्रध्वजिनीपतिर्द्रुतगतिः ख्यातो निशुंभाख्यया ॥ १३ ॥

मध्ये कुन्तं गृहीत्वा चलितमुभयतस्संमिलत्कोटियुग्मं
चेतोवृत्तेस्समानाधिकरणगमनं द्रागमारुह्य वाहम् ।
विष्वक्संदृश्यमानो विहितरिपुचमूभङ्गसंहारघोर-
स्साक्षात्कल्कीव सोऽयं रणशिरसि हयग्रीवनामा समिधे ॥ १४ ॥

आशापाशवतो विपाशयति यस्तं दैत्यपाशश्चलन्
बन्धुं यादवबान्धवं बत मुरः पाशी रणे वारुणैः ।
आरूढो मदमन्थरञ्जलधरश्रीबन्धुरं सिन्धुरं
धत्ते विन्ध्यधराधराग्रविहरद्धाराधरौघश्रियम् ॥ १५ ॥

जगद्विदितवैभवानां यादवानामभिधानमाम्रेडनम् । क इव नयत्यमीषां शौर्यमाश्चर्यचतुष्पथं नयनपथम् । यतः ;

प्रहर्षहृष्यत्तनुरोमघर्षैर्बाष्पायमाणानि विलोचनानि ।
इच्छानुरूपं मुहुरीक्षमाण आस्कन्दनं नन्दति निन्दतीन्द्रः ॥ १६ ॥

यदेतेषां योद्धारोप्येवमेव युध्यन्ति । किमुत यादवाः ? पश्य ! पश्य !!

प्रहरणघट्टितप्रहरणश्लथलोहलवैः
क्षतजकणार्द्रगात्रपतितैर्निबिडैः परितः ।
विदलितकंकटा अपि विधूतविभेदभया
विदधति सादिनः [1] क्वचन मानधनं प्रधनम् ॥ १७ ॥

इतो दृष्टिर्दीयताम् ।

विन्यस्याग्रपदे मदेभवदने तद्दन्तशंकुद्वय-
प्रोतस्वोदरमध्यसीमनि रुषा प्रोच्चंभिते वाजिनि ।
आतन्वन्नपपातभीतिरपरो [2] यन्त्राश्वसादी समं
शस्त्राशस्त्रि चिराय साहसरसस्साश्चर्यमालोक्यते ॥ १८ ॥

पर्वतः — (सश्लाघम्) भगवन्नत्र [3] निर्धारणगर्भमेकवीरपदम् ।

---

1. क्रकचमान-क-पाठः । 2. यन्त्रा-अश्वसादी-इति छेदः । यन्त्रा-इति तृतीयैकवचनम् । हास्तिपकेनेत्यर्थः । 3. एकेषां वीरः-इति विग्रहवाक्यम् ।

नारदः — सखे ! पर्वत ! इदमपि चित्रीयते ।

प्रोतः परेणोन्नमितोऽधिकुन्तं त्वगं भ्रमंस्तत्र विशालयिष्यन् ।
प्रतिप्रहर्तुं रिपुमेकवीरः करोत्यसौ स्तंभनटस्य लक्ष्मीम् ॥ १९ ॥

पर्वतः — भगवन्नौपयिकमेतदविवेकसान्निवेशो मदावेश इति । यतः,

करं विकृत्तं क्षतजारुणं करी परेण तादृक्परिमाणयाविदन् ।
पुरः पतन्त्या रुधिरौघधारया करोति भूयः कदनं मदोद्धतः ॥ २० ॥

नारदः — दिष्ट्येदमायोधनमनुगृह्यते । पश्य ! पश्य ! !

क्षरत्क्षतजपङ्किला दलितकुंभिकुंभस्थली-
मणिप्रकरदन्तुरा द्रुतसमीकृता स्यन्दनैः ।
मदात्वळपदाहता मुहुरसौ न सांग्रामिकी
पदातिपदचंक्रमे वितनुतेऽन्तरायं मही ॥ २१ ॥

पर्वतः — सममेव [1] संहृता यादवदानवसैनिकाः । अतः कुतः कौतुकं केशवस्य ?

नारदः —
युगपदमी विशन्ति युधि वीरवरा निहता
दिनकरमण्डलं स च दधाति चलाचलताम् ।
अयमपि वल्गती[2]न्दुदिननाथदृगात्मजयं
हृदि विवदन्निमित्तविधि[3]विन्दुरहो ! मुरहा ॥ २२ ॥

पर्वतः — भगवन् ! नातिदूरवर्तिनोरावयोर्दृशां शोणितशमिता रणरेणवो न रुंधन्ति पन्थानम् । कथमिव गगनमध्यमध्यासीनानाम् ?

नारदः — सखे ! पर्वत !

पतत्रिणां व्योम्नि पतत्रवातैः
क्रव्यादनानां कृतमण्डलानाम् ।
आयोधनालोकनमन्तरायं
न रेणवो नाकसदां नयन्ति ॥ २३ ॥

पर्वतः — (सस्मितम्) भगवन् ! इतो व्योम्नि दृष्टिर्दीयताम् ।

कश्चित्सपत्नकण्ठास्रं पिपासुर्निहतस्स्वयम् ।
न तृप्यति पिबन् जातु दिव्यकान्ताधरामृतम् ॥ २४ ॥

---

1. संभृता इति पाठान्तरम् । 2. इन्दुः=चन्द्रः दिननाथः=सूर्यः तावेव दृशौ यस्य सः ।
3. विन्दुः=ज्ञाता । विद ज्ञाने विन्दुरिच्छुः ३—२—१६९ इति उप्रत्ययो नुमागमश्च निपात्यते ।

नारदः — (साश्चर्यम्) सखे ! न दृष्टचरमिय[1]द्वारणमारणम् ।

पर्वतः — कथमिव ?

नारदः — पुष्पाण्यंबरभूरुहामपचितान्याकुड्मळं भूषणे
यद्यन्मौक्तिकमात्मनां सुरचमूहारेषु यद्यत् स्थितम् ।
सर्वं संहृतयोधसंवृतिकृते माल्योपयुक्तं पुरै-
वैतानि द्विपमौक्तिकान्यनवधीन्याह्लादयन्तेऽमरीः ॥ २५ ॥

एवमेव योधानाम् । यतः—

संग्रामसाहससमार्जितपुण्यजातै-
र्योधैर्हृतास्वपि बलात्परिचारिकासु ।
अच्छत्रचामरमलक्षितराजभावं
देवा विदन्ति नयनैर्दिवि देवराजम् ॥ २६ ॥

पर्वतः — (अधो दृष्ट्वा) अहो ! अत्रैवानुभवति साम्राज्यं बीभत्सः । पश्य ! पश्य !!

सृक्कासृग्धरलेहनास्यविलुठत्प्रेतक्षरच्छोणित-
स्वीकाराकुलजिह्विकाचटचटानुस्यूतताळस्वनाः ।
पाणिद्वंद्वगृहीतदन्तिरदना नानापिशाचीर्वसा-
माल्यामण्डलदण्डलास्यरसिकास्संग्रामरंगांकणे ॥ २७ ॥

दन्ताघट्टितदन्तिमस्तकमणीजाताग्निपक्वामिष-
ग्रासप्रच्युतखण्डिकाप्रतिसमाधानोल्लसत्कूर्परैः ।
दंष्ट्रालंबिसिराळसैन्धवशव[2]स्वप्नक्वशिशूत्कंठया
भूतैस्संचितमांससंचयकरैर्भूचक्रमाक्रम्यते ॥ २८ ॥

(अन्यत्र प्रदर्श्य)

एष स्वादुतरो मुमूर्षुरयमप्यास्वादनीयो युवा
मेदस्तद्घृतमेदुरं मृदुरसौ कंकाळ आस्तं नवम् ।
शुण्डेयं विगतास्थिरित्यधिगतालापा दुरापाः क्वचित्
खादन्तः कुणपान् कराळवदना धावन्ति भूताः परे ॥ २९ ॥

क्रीडन्त्यत्र कराग्रशूलयुगळप्रोताश्वसादिद्वय-
प्रेताकल्पितसंगरेक्षणकृतामोदाट्टहासा इमे ।

---

1. वारणानां – गजानां, मारणं – हिंसनम् । 2. स्वप्नक् निद्राशील: ।

अन्ये [1] त्वाप्रपदीनदन्तवसनप्रान्तप्रसक्तामिष-
ग्रासव्यग्रमुखैर्मिथः कृतरणैः क्रन्तद्वृकैस्संवृताः ॥ ३० ॥

इतो दृष्टिर्दीयताम् ।

पक्ष्मोत्क्षेपणलक्षितेक्षणदरीमध्यस्फुरत्तारका-
दीपानुक्षणदर्शितक्षणरुचिक्षीणान्यदृग्वीक्षणाः ।
जृंभारंभविजृंभिताट्टहासितैस्संक्षोभयन्ति क्षितिं
तूर्णाघूर्णितकेशशङ्कुनिचया डाकिन्य एता इमाम् ॥ ३१ ॥

नासाकन्दरभस्त्रिकामुखपटीनिष्क्रान्तदन्तान्तर-
श्रेणीयत्नविनिर्गताननमरुद्भिध्वस्तपार्श्वद्रुमाः ।
वक्त्रैरग्निकणान्वमन्ति विवृतैर्भ्राम्यद्भिरभ्रे भृशं
वेताळा विहितातपत्रवलया मांसासुलोलैः [2] वळैः ॥ ३२ ॥

(नेपथ्ये)

'कष्टं कष्टम्'

(सर्वे दत्तकर्णास्ससंभ्रमं शृण्वन्ति)

(पुनर्नेपथ्ये)

येन केनापि [3] यादवदवकुठारकाण्डेन कुट्टाकमठेन यादवदायादेन मम पुनरकुण्ठ-महिमानो [4] महामात्रा मुर–निसुंभ–हयग्रीव–पञ्चजनप्रभृतयो वञ्चिताः । तत्किमिति सहते दानवपतिः ? सर्वेऽपि शृण्वन्तु ।

वैरशुद्धिविधौ वीर[5]श्चतुर्भिस्स्वैश्चमूवरैः ।
अनेन पश्चतां सद्यस्संयोजयति साहसी ॥ ३३ ॥

पर्वतः — (श्रुत्वा सभयोत्कंपं) भगवन् ! प्रतिहतममङ्गळम् । प्रतिहतममङ्गळम् ।

नारदः — कथमिव ?

पर्वतः — (तमेव श्लोकं पठति)

नारदः — सखे ! मा भैषीः प्रतिहतममङ्गळम् । प्रतिहतममङ्गळम् । तत्रैव [6] दानवेऽसमर्थः पर्यवस्यति ।

पर्वतः — (सहर्षं प्रतीचीं दृष्ट्वा) अहो ! किमिदमहर्निशासंधावपि संध्यायते ?

---

1. आप्रपदीनं=पादाग्रपर्यन्तलम्बि । 2. वळैः=काकैः ।
3. दानवदवकुठार–इति पाठान्तरम् । 4. प्रधानाः अमात्याः 5. चतुर्भिस्तैः-इति पाठान्तरम् ।
6. दानवे सति–इति पाठान्तरम् ।

नारदः—(विमृश्य) आः ! ज्ञातम् । मन्त्रिवधामर्षिणा दानवनाथेन भवितव्यम्; यदेतत्पुरस्सरसेनारुण-रेणवो दृश्यन्ते ।

पर्वतः — सम्यगवधारितम् । एतेऽपि महाजनाः [1]उद्ग्रीवयन्ते ।

नारदः — (पुरो दृष्ट्वा) कथमसौ,

तुङ्गं वल्गत्तुरङ्गं त्वरितमधिगतः कूजिताङ्गं [2] शताङ्गं
बिभ्राणोऽ[3]भ्रेभदन्तक्षतिकिणमुरसा वीरलक्ष्मीनखाङ्कम् ।
आगर्भावासमङ्कैरहरहरधिकं वर्धमानं वहन्त्या
[4]धात्र्या मात्रापि यत्नाद्धृतचरणभरस्सोऽयमायाति वीरः ॥ ३४ ॥

वक्त्रैर्भुग्नैस्सिरालैर्विषममतिविषोद्गारिभिः क्षुण्णचूडा-
रत्नव्याकीर्णधूळी[5]स्स्थपुटितनयनेष्वापतन्तीः प्रमार्ष्टुम् ।
बाहुभ्यामप्यशक्तो[6]भुजगपरिवृढस्तावतीभिः[7] कथंचित्
जिह्वाभिर्लेलिहानो वहति रथपदन्यासमस्यातिभारम् ॥ ३५ ॥

सङ्घर्षान्निजवेगसंभवमहावातूलसंभ्रामिते
लोकालोकधराधरे तत इतो निर्यत्नमुत्तेजितम् ।
एतेनातपवारणश्रियमिदं शूलं भुजावर्तितं
धत्ते दानवसैन्यविश्रमकृते च्छायां समापादयत् ॥ ३६ ॥

एतेनाहवसाहसप्रतिभयेनायोधने निर्जिता
बंदीकृत्य नियोजिताः करुणया कैङ्कर्यभाजां पदे ।
देवास्स्वासु तथाविधासु युवतिष्वेवातियत्नार्जिता
जारस्त्रीरतिनिर्वृतीरनुभवन्त्यत्रामरेन्द्रादयः ॥ ३७ ॥

पर्वतः — अस्य भुजयोराश्चर्यमोजायितम् । पश्य ! पश्य !!

असौ रुधिरवाहिनी प्रतिपदं निरुद्धा द्विषां
कबंधनिचयै रथप्रहतपद्धतिव्यापिनी ।
सवेगमनुसारिणी दनुजनेतुरिंधेतरां
भगीरथरथानुगा बहुमुखीव भागीरथी ॥ ३८ ॥

---

1. उद्ग्रीवायन्ते इति पाठान्तरम् ।
2. शताङ्गः=रथः । 3. अभ्रेभः=ऐरावतः । 4. धात्री=क्षितिः । 5. स्थपुटितानि=विषमोन्नतानि ।
6. भुजगपरिवृढः=आदिशेषः । 7. तावतीभिः=नयनसमसङ्ख्याकाभिः (द्विजिह्वत्वात् तथात्वम्) ।

नारदः — (सावषादम्)

स्यूताकर्णिशरानुषक्तधमनीदाम्नामुनानीकिनी
नाभिक्रामति नापयाति विषमं कृष्टा मिथो यादवी ।
रक्षित्रापि न रक्षिता भयवशादालोकयन्ती दिशो
बद्धानामिव [1]यादसामियमय [2]स्यानाययन्त्रैस्तुलाम् ॥ ३९ ॥

(अन्यतो दृष्ट्वा सविमर्शम्)

कोऽसौ विरथ एव समरधरणिमवतरति? (सम्यङ्निरूप्य)

अश्रान्त [3]पार्श्वपरिवर्तितया शताङ्गो
[4]घाटाकिणै[5]र्वनशुकैश्च शताङ्ग [6]घोटाः ।
सूतोऽप्यकालकुसुमैर्विदितस्स एव
[7]पश्यालिकप्रहरणप्रथितापदानः ॥ ४० ॥

कथमसौ —

बालक्रीडितशांबरीप्रसवभूर्दैत्येन्द्र[8]निर्गंधना
[9]काण्डीरा चललक्ष्यखण्डनजगत्प्रख्यातबाहूदया ।
श्रीशस्यापि [10]पितृणसंयमनतस्संमोचयित्री सखे!
सेयं संगरसीम्नि दीव्यति रतेः पातिव्रती देवता ॥ ४१ ॥

अस्य खलु

शताङ्गः प्रेर्यमाणोऽपि मुहुर्मान्द्यन्न मुञ्चति ।
पक्षानिलैः प्रतिहतस्तुरगाणां तरस्विनाम् ॥ ४२ ॥

पर्वतः — परस्परेक्षणक्षणप्रवर्धमानमानसंप्रेरणानुषञ्जितरथ्याननयोर्नरकासुरप्रद्युम्नयोर्विवाद इव श्रूयते। तत्सावधानं शृणुवः । (कर्णं दत्त्वा) कथमेवमभिधीयते नरकासुरेण – "अरे रे मर्त्यकाकपक्षिन्! किं कुलं त्वया विच्छिद्यते?" (पुनः कर्णं दत्वा) प्रद्युम्नोऽप्युत्तरं ददाति— "भो भो दानवराज! अहं तु यदुवीरः ।

नरकासुरः — (वीरशब्दश्रवणेन सक्रोधं) किं स्त्रीवधवीरः? उत धात्रीसङ्गवीरः?

---

1. यादांसि जलजन्तवः 2. आनायः—जालम् ।
3. यात्र–इति पाठान्तरम् । 4. घाटा=ग्रीवापश्चाद्भागः । 5. वनशुकेषु–इति पाठान्तरम् ।
6. घोटाः=अश्वाः 7. पश्यालिकः=रुद्रः तस्य प्रहरणेन प्रथितं अपदानं यस्य सः–मन्मथस्यावतारः प्रद्युम्न इत्यर्थः । 8. निर्गंधना=मारणं । 9. काण्डीरा–काण्डास्त्रवती 'स्यात्काण्डवांस्तु काण्डीरः' इत्यमरः । काण्डः—बाणः तद्वती इति यावत् । 10. पितृ=ऋण इत्यत्र सवर्णदीर्घः ।

प्रद्युम्नः — अहन्तु दैत्यारेर्नन्दनः शंबरशासनः । त्वामहमेव जानामि 'वीरभोज्याया भुवो नन्दन' इति ।

नरकः — (सक्रोधम्) अरे रे जाल्म !

पञ्चैव तव पुष्पाणि मृदूनि क्वनु मार्गणाः ? ।
प्रयोज्या मृदुगात्रेषु, क्व मे वज्रसमाश्शराः ? ॥ ४३ ॥

प्रद्युम्नः — (सस्मितं)

पञ्चैव तव च प्राणाः पञ्चैव च शरा इमे ।
पन्नगेन्द्रप्रतीकाशाः वैषम्यं नात्र [1] लक्षये ॥ ४४ ॥

किञ्च — पश्य [2] पश्यालिकस्याक्षि तार्तीयीकं प्रियासु यत् ।
इन्दीवरतुलामेति कल्पान्तेऽनलकल्पताम् ॥ ४५ ॥

पर्वतः — दानवः सस्मितमेवं ब्रवीति—'भगवतो भवानीपतेरन्यादृशवैभवानां लोचनानां महिमानं जानन्त एव जानन्ति' ।

नारदः — कुमारस्सव्यंग्यमुत्तरं ददाति । प्रद्युम्नः—अरे रे व्यर्थवचनाहवोपजीविन् ! किं न स्मर्यते बाणाहवव्यापारः ?

पर्वतः — नरकासुरो व्यङ्ग्यार्थमजानन्निवायमर्यामिति बाणैः प्रद्युम्नमभिवर्षति ।

नारदः — अनिवार्यः खल्वाजानसिद्धोऽभिनिवेशः । यद्यापि—

कर्णपूरकलिकानुषङ्गिणीं[3] मञ्जुगुञ्जदलिपुञ्जशिञ्जिनीम् ।
आयतामिषुपथानुसारिणीं यत्नपूर्वमनुकर्षति स्मरः ॥ ४६ ॥

एतदप्युपकाराय कल्पते—

नमदिक्षुचापपरुरुचलन्मणीघुटिकाभिरेनमिषवो विनिर्गताः ।
अपि धन्विनां नळाकिनां [4] परस्परं भुजगालिविस्मयकरं ब्रुवन्त्यमी ॥

पर्वतः — (सशिरःकंपं)

वासराननयोर्बाणा वासन्तानपि शैशिरान् ।
आम्रेडयन्ति शतशश्चिरप्राप्याननुक्षणम् ॥ ४८ ॥

---

1. लक्ष्यते-इति पाठान्तरम् । 2. पश्यालिकः=शिवः ।

3. मञ्जु गुञ्जन्तः अलिपुञ्जा एव शिञ्जिनी—ज्या । सा कर्णपूरकलिकायामनुषक्ता भवति । अस्य पुष्पबाणत्वात् सा तदनुसारिणी च भवति । मधुकराणां पुष्पानुसरणं हि स्वाभाविकम् । 4. पुरस्सरं-इति भुजशालि इति च पाठान्तरम् ।

नारदः — सखे पर्वत ! पश्य ! पश्य !!

दलितात्कुसुमेषुबाणटङ्कैर्दनुजेन्द्रोरुरसः कृताधिवासाः ।
उदिता धृतदिग्गजेभदन्तात् पटवासत्वमयन्त्यमी परागाः ॥ ४८ ॥

[1] पुष्पेषुमार्गणकृतव्रणलोचनेषु
सौरभ्यसंक्रमितषट्पदतारकेषु ।
एनं वपुष्यनिमिषेष्वपि पक्ष्मपातै-
रक्ष्णोर्विदन्ति विबुधा न सहस्रनेत्रम् ॥ ४९ ॥

किञ्च —

पुष्पेषुबाणनिर्भिन्ना दैत्या देवीभिरर्पिताम् ।
प्रेत्य भीत्यानुमोदन्ते नापि तां [2]वरणस्रजम् ॥ ५० ॥

पर्वतः — भगवन्नत्रापि दृष्टिर्दीयताम् ।

पुरापराधेन पुरामरातेरवाप्तवान्यामपि तामवस्थाम् ।
अद्यानुकूलां मनुते मनोभूश्शरव्यथां प्राप्य शरीरभोग्याम् ॥ ५१ ॥

नारदः — (सविषादं) अहह ! सखे ! कुमारोऽपि दानवेन्द्रविजयसंस्मारितशंबरहरगर्वापरकण्ठैस्सात्यकि-प्रभृतिभिर्यदुभिः समरधरणेरपसार्यते ।

पर्वतः — (अन्यतो दृष्ट्वा) नेदं खेदपदम् । किन्तु अस्मत्प्रमदपयोनिधेः पूर्णिमैवायं समयः । यतः, कुमारपराजयेन्धनसमिन्धानकोपधूमध्वजायमानभ्रुकुटि[3]विटङ्कः स्वयमेव समराभिमुखमभिपतति :—

स एष [4]पर्यायशयाननेत्रो जगत्त्रयग्रासकृदिन्द्रजालो ।
अनस्तिमातापितृकस्स्ववन्दी [5]माङ्गल्यदो मङ्गलदेवतायाः ॥ ५२ ॥

नारदः — सखे पर्वत ! नरकासुरो वासुदेवमेवमभिदधाति ; 'अरे गोपडिंभ ! प्राप्तोऽसि दिष्ट्यैव दृष्टिपथम् ।

---

1. पुष्पेषुः=प्रद्युम्नः तस्य मार्गणैः (सहस्रशः नरकासुरगात्रे) कृतानि व्रणान्येव लोचनानि तेषु सौरभ्यवशात् संक्रमिताः (इषूणां पुष्पत्वमिह भाव्यं) षट्पदा एव तारकाः । सहस्राक्षस्य अनिमेषाणि लोचनानीव इमानि । तथापि (मुखे) अक्ष्णोः पक्ष्मपातैः एनं=नरकासुरं सहस्रनेत्रादन्यं निर्धारयन्ति ।
2. तत्रत्यानां पुष्पाणामपि तदीयास्त्रत्वसंभावनयेति भावः ।
3. विटङ्कः=सुन्दरः । 4. पर्यायेण शयाने (सूर्याचन्द्रमसावेव) नेत्रे यस्य स तथोक्तः । 5. मङ्गळदेवतायाः= लक्ष्म्याः, माङ्गल्यदः=पतिः स एष समराभिमुखमभिपतति इत्यन्वयः ।

पश्येमौ परिघोपमौ मम भुजौ नैवा[1]पदानं तयो-
स्स्तौम्येषा न हि [2]बाहुशालिपदवी ताभ्यां श्रुतिभ्यां पुनः।
स्तूयेताद्भुतकारि जीवति चिरं जीवेश्वरे[3]ऽमर्त्यसू-
[4]र्विश्वस्ताङ्कनमात्मनो विवृणुते याभ्यां तवापि प्रसूः ॥ ५२ ॥

(सत्यभामां दृष्ट्वा माधवं प्रति)

विपिनमहिषच्छायः कायः क्व ते ? क्वनु चन्द्रवत्
कनकसदृशी तन्वी धन्वीकृतायतझिल्लिका।
अधिकतिमिरोत्कर्षा [5]वर्षाक्षपा क्वनु शारदी
क्वनु वद कला चान्द्री सान्द्रीकृतामृतदीधितिः ॥ ५३ ॥

माधवस्सत्यभामां प्रति सपरिहासं किमाह 'देवि! दानवेन्द्रस्त्वां कामयते'। सत्यभामयापि सम्यगभिधीयते 'आर्यपुत्र! अप्सरोभिरभिलषितस्यास्य दानवस्य न मर्त्यवधूरनुराग-पदम्।'

पर्वतः — सखे नारद! इदन्तु मम मनःखेदपदम्;

येनेयमंबुधिजले धरणी निमग्ना
पूर्वं वराहवपुषा पुनरुद्धृताऽभूत्।
[6]तन्मज्जितां तनयशोकसरस्वदन्त-
स्तामुद्धरिष्यति जगत्तितयेषु कोऽन्यः ॥ ५४ ॥

माधवेनाप्युत्तरं दीयते;

भोजात्मजामभिलषन् दमघोषसूनु-
र्यस्ते सुहृत्सवनसंसदि धर्मसूनोः।
आशाभिपूरणमगादमुनैव युक्तं
सर्वंसहातनय! [7]साप्तपदीनमेतत् ॥ ५५ ॥

नरकासुरोऽपि वासुदेववचनममृष्यमाणो बाणपरंपराभिस्तमेन [8]मभिवर्षति। यतः;

---

1. अपदानं वृत्तं कर्म। 2. बाहुशालिपदवी = वीराणां मार्गः।
3. अमर्त्यसूः = देवमाता अदितिः तवापि (उपेन्द्रस्य) प्रसूः जननी।
4. विश्वस्तांकनं = विधवाचिह्नं। ताटंकशून्यत्वात्। 5. वर्षक्षपा—इति क-पाठः।
6. तन्मज्जितां = तेनैव भगवता (पुत्रशोकाख्यसागरान्तः) मज्जितां तां = भुवं।
7. साप्तपदीनं = सख्यम्।
8. अभिवर्षयति इति 'क' पाठः।

दैत्येन्द्रबाणवर्षेण ककुभः कबलीकृताः ।
विस्मिता इव वीर्येण कन्दळद्रोमहर्षणाः ॥ ५६ ॥

नारदः — सखे पर्वत ! सर्वजनाविस्मयायेदम् ।

[1]दैतेयशासनशरासननिर्गतेन
[2]काण्डेन खण्डिततनून् पततोऽन्तरिक्षात् ।
मुक्तारवान्मुहुरपत्रपयेव बाणा-
नालोकयानतमुखान [3]वनीसुतस्य ॥ ५७ ॥

किञ्च ;

मैरावणभग्नदन्तशकलेष्वापुंखमारोपिता
गात्रे कुञ्जरपत्रकद्युतिवहेष्वस्यामरद्रोहिणः ।
कृष्णेन प्रथमं शरा विदधते नैव व्यथां तन्वते
भूयोऽप्यश्लथनाय मार्गणगणैस्संदष्टकीलश्रियम् ॥ ५८ ॥

पर्वतः — सखे नारद ! दानवेन्द्रोपि रोषकषायितेक्षणः पक्षतिषु तक्षति [4]पत्रिभिः पक्षिराजम् । अहह !

रुधिरै रूषिताङ्गानां पत्रिणां पतगेश्वरः ।
आम्रेडयति पत्राणि च्छिन्नैरस्य निजच्छदैः ॥ ५९ ॥

नारदः — (सहर्षं) सखे पर्वत !

[5]हिण्डनादण्डजेन्द्रस्य पुण्डरीकदृशारिपोः ।
सीदन्ति स्यन्दनहया विशिखैर्विमुखीकृताः ॥ ६० ॥

पर्वतः — अनिवार्यः खल्वभिमानिनामहंकारग्रंथिः ।

नारदः — कथमिव ?

पर्वतः — सपत्रैः पत्रिभिश्शौरेर्दैत्येन्दोरथ वाजिभिः ।
अस्यातिमानिता तिर्यङ्मुखता चापि बोधिता ॥ ६१ ॥

नारदः — (सर्वतो दृष्ट्वा) कथमितस्ततस्सर्वैरपि सुरासुरैरपक्रम्यते ?

पर्वतः — तदावामप्युपसृत्यास्वहे ।

नारदः — (समन्तादवलोक्य) अहो ! त्रिभुवनसंक्षोभकारणं कदनमुपक्रान्तं महावीराभ्याम् । तथाहि ;

---

1. दैतेयशासनः = कृष्णः 2. काण्डः = बाणः 3. अवनीसुतः = नरकासुरः ।
4. पतत्रीभिः क-पाठः । 5. हिण्डनात् = भ्रमणात् ।

आग्नेयं वारुणेनास्त्रं वारुणं मारुतेन च ।
निहन्ति नरकश्शौरेः कृतप्रतिकृतौ [1]कृती ॥ ६२ ॥

किञ्च ;　यद्दैवताः प्रतिहता विशिखाः [2]कळंबै-
र्यद्दैवतैर्यदुपतेरपि दानवेन्द्रोः ।
अत्रानताननममूनि पराजितानि
पश्यन्ति तानि विजयीन्यधिदैवतानि ॥ ६३ ॥

पर्वतः — अहो ! समरसमापननिपुणसन्नाहः कोऽयं कळकळः कबळयति मनांसि नः कौतूहलेन ? तत्सावधानमाकर्णयावः ।

(नेपथ्ये)

चक्रेण बाणभुजकर्तनपक्षपात-
शून्यानुरञ्जितमुखारसहस्रकेण ।
स्कंधावरोपितशिरास्समरानुमोदी
शेते स वीरशयने सुरराजवैरी ॥ ६४ ॥

उभौ — (आकर्ण्य सानन्दं ससंभ्रममुपसृत्य चाधस्तात्पश्यतः)

नारदः— (सकरुणं) अहो ! प्राग्ज्योतिषपते ! स त्वं कथमपराजितः परासुरसि ?

संवर्तपावकसमान[3]भिवर्षतेषून्
संग्रामसीम्नि भवताऽपहृतातपत्रे ।
येन प्रचेतसि जितेऽप्यधिकाश्रुपूरै-
रन्तःपुरावनमवर्धत तद्वधूनाम् ॥ ६५ ॥

(निर्वर्ण्य) सखे पर्वत ! [4]निर्भरभारः खलु निरसूनां देहबन्धः । यदिदानीं ;

आनम्रैरुत्तमाङ्गैरुदितमणिशतालातभीतद्रुताशा-
दन्तीन्द्रत्यक्तसाह्यैर्द्विगुणितभरणश्रान्तिरेकेन मूर्ध्ना ।
निःश्वासान् भुग्ननासाविवरविरळितान्मुञ्चता मध्यमेन
क्षोणीमेनां कथञ्चिद्वहति फणधरग्रामणीरस्य भारात् ॥ ६६ ॥

पर्वतः — (कर्णं दत्त्वा) किमिदं दानवेन्द्रकबन्धाभिमुखीनां दानवीनामिव परिदेवनं श्रूयते ?

---

1. कृती = निपुणः । 2. कळंबाः = शराः । 3. अभिवर्षता–इषून्–इति पदच्छेदः ।
4. निर्भरभारः = अतिशयितभारः ।

प्रेयस्येका रमण भवताऽलंकृता कुण्डलाभ्यां
मातुर्नेतुर्निखिलमरुतां[1] हन्त दन्तेन यासाम् ।
हैरंबेण द्रुतमभिहिता तत्क्रिया सा कृतेति
ह्रीणो द्रष्टुं स्वपिषि दयितास्ता इमा मीलिताक्षः ॥ ६७ ॥

अहह ! अपहृतमदितेर्यत्कुण्डलद्वंद्वमेकं
दनुजरमण ! हृत्वा दानवीनामिदन्नः ।
सकलमपि जगाम स्वं पदं सांप्रतं त-
त्स्वामिव महिसुराणां स्वानि दुर्नीतिभाजः ॥ ६८ ॥

(नेपथ्ये)

नीतानां नगरीं निजां पुनरदोबंदीकृतानां चिरा-
द्देवीनामवलोकनेषु चतुरैर्यद्देवराजोऽभ्यगात् ।
आवर्त्याननमप्यहो बहुमुखैर्मन्दाक्षमक्ष्णां शतै-
रन्योऽस्मादहिपुंगवात्तदवनौ कस्तादृशं वर्णयेत् ॥ ६९ ॥

नारदः — (सामोदं) सखे पर्वत ! सर्वसहानन्दनबंदीकृतवृन्दारकावलोकनाय साधयावः । (इति परिक्रामन्तौ विलोक्य सहर्षं अन्योन्यं) सखे ! पश्य ! पश्य ! !

सामोदैस्स्तूयमानस्समरभुवि सुरैः पक्षिराजेन पक्ष-
विश्रान्त्यै वारिसिक्तैर्व्यजनसहचरैस्सादरं वीज्यमानः ।
प्रद्युम्नन्यस्तशस्त्रः प्रमुदितहृदयैर्यादवैर्यादवेन्द्रो
भामाबाह्ववलंबी जयति परिवृतो वीरभोगीणबाहुः ॥ ७० ॥

(इति निष्क्रान्तौ)

इति श्रीपारिजातनाटके चतुर्थोऽङ्कः ॥

---

1. निखिलमरुतां नेतुः=इन्द्रस्य, मातुः=अदितेः कुण्डलाभ्यां इत्यन्वयः ।

श्लो 68 महिसुराणां स्वं (अपहृतं सत्) दुर्नीतिभाजः अपहर्तुः स्वानि हृत्वा यथा स्वं पदं प्रति गच्छति ; तथा अदितेः अपहृतं एकं कुण्डलयुगलं, अस्माकं सकलमपि कुण्डलद्वंद्वं हृत्वा प्रतिनिवृत्तं (वैधव्येन कुण्डलधारणाप्रसक्तेरिति भावः)

श्लो 69 अदोबंदीकृतानां = अमुना बंदीकृताः = अदोबंदीकृताः तासां ।

श्रीगणेशाय नमः ॥

जयति जयन्तीपतिर्जगति ।

कविनीलकण्ठविरचितं जारजातशतम् ॥

यः कश्चनास्मदीये काव्ये परकीयतामवदत् ।
तस्य कृते कर्तुमिदं [1] आरब्धं जारजातशतम् ॥ १ ॥

यः परकीयं काव्यं स्वीयं ब्रूतेऽथ चोरयेद्योऽर्थम् ।
इह तावपि प्रसक्तौ मन्तव्यौ जारजाततया ॥ २ ॥

[2] कुण्डेयं कविता मे तथ्यं मत्कर्तृका नैव ।
निःश्वसितं ननु शंभोराविर्भूतं मदाननादेतत् ॥ ३ ॥

जारज मत्कवितायाः कर्तान्यश्चेदवश्यवक्तव्यः ।
वक्तव्यो भवभूतिः सहृदयपङ्क्तौ प्रवेक्ष्यसि त्वमपि ॥ ४ ॥

अस्माकं कवितेयं यद्यपि जननीव ते मान्या ।
तदपि न ते जननीवत् सुलभान्यैर्जारजात जानीहि ॥ ५ ॥

त्वन्मातेव मदीया कविता किंस्वित् परैः सुलभा ।
यज्जारजात जनकभ्रान्तिरियं जायते भवतः ॥ ६ ॥

सर्वत्र यस्य वंशे सान्दिग्धो जन्यजनकसंबन्धः । ९ पूर्वार्धम् ।

❀ ❀ ❀ ❀ ❀ ❀

पातिव्रत्यमधास्यत् तपस्विनीयं तदा मन्ये ॥ २८ उत्तरार्धम् ॥

---

1. The hiatus or want of *sandhi* is necessary for the sake of metre. cf. वचने अन्येषां in v. 81 below.

2. कुण्ड, a son born in adultery, the son of a woman born from a man other than her husband while the husband is alive पत्यौ जीवति कुण्डः स्यात् ।

—मनु. ३.१७४.

जातु यमेनाज्ञप्तस्त्वज्जननीजारमानेतुम् ।
कुण्ड मृतो यमदूतः प्रत्युत सर्वत्र संशयेनैव ॥ २९ ॥

कुण्ड सपिण्डेऽपि मृते निजमुण्डं मुण्डनीयं न ।
तावन्निजजननीतो जीवत्पितृकत्वमेव निर्धार्यम् ॥ ३० ॥

क्षणमात्रं तव मात्रा प्रतिपुरुषं रक्षितं प्रेम ।
रक्षसि तावन्मात्रं यावत् तावन्न दोषस्ते ॥ ३२ ॥

यैर्माता मिलिता ते नाम्नैवासन् भुजंगास्ते ।
त्वं तु चरित्रैरखिलैर्जारज जातो भुजंगोऽसि ॥ ३६ ॥

तव जारजात माता याता सङ्गं भुजंगेन ।
त्वं वृश्चिकस्तु जातः पश्चाद्विषवान् मुखे साधुः ॥ ३७ ॥

तातेति लालयन्तं त्वां ते तातं न ते परं माता ।
अहसीत् किन्तु मृतेऽस्मिंस्तथा रुदन्तं भवन्तमप्यन्तः ॥ ३८ ॥

जारज ना रजासि त्वन्मातरि कोऽपि प्रवृत्त एवं त्वम् ।
जातोऽतः प्रकृतिस्ते मलिना कलिना वृथाऽयशो लब्धम् ॥ ३९ ॥

जारज जननीदोषैः सममुद्भूत् ते यतो जन्म ।
आजन्मसिद्ध एव त्वयि दोषाणां ततोऽस्ति संबन्धः ॥ ४० ॥

जारज बर्बूरवनं संकेतं ते जनन्यकृत ।
अत इव मुखं त्वदीयं कण्टकमयमेव तादृशैर्वचनैः ॥ ४४ ॥

पुरुषः स नावशिष्टस्त्वन्माता यत्र नाकरोत् प्रीतिम् ।
त्वं तु करोषि द्वेषं जारज केनेह सर्वत्र ॥ ४६ ॥

नानाप्रकारमादरमाविष्कुरुते रहोमिलितः ।
पश्यत्यपि न सभायां किमिदं कुण्डेन मातृतोऽशिक्षि ॥ ४७ ॥

जारज तदा तव स्यान्निजजननीजारगोपनं शक्यम् ।
यदि न भवेद् भुवनेऽस्मिन्निन्दुदिनेशानलोद्योतः ॥ ४८ ॥

अयि जारजात जाने माता ते ज्ञानिनी जाता ।
प्रतिपुरुषं पतिभावाद्द्वैतं यद्भावयत्येषा ॥ ५० ॥

जन्म तवाभूज्जारान्मातुः पत्युः पुनः ख्यातम् ।
आजन्मप्रलयमेतत् त्वामनृतं तत् त्यजेत् कस्मात् ॥ ५१ ॥

अयि जारजात जाता भवतो नवतोऽधिकास्ताताः ।
येन त्वदीयताताश्लिष्टोऽङ्को नावशिष्टोऽयम् ॥ ५२ ॥

कः संकोचः कार्ये शपथे तातस्य जारजातस्य ।
आयुष्मत्पितृकत्वं यस्यैकस्मिन्नपि स्थिते पुरुषे ॥ ५३ ॥

जारज यदपि महालयकालः श्राद्धेऽतिदुर्लभस्तदपि ।
श्राद्धं त्वया तु कार्यं जनकानां संशये कस्य ॥ ५४ ॥

अयि जारजात भवतः पितृभिः प्रादुष्कृतेषु हस्तेषु ।
त्वयि पिण्डदे भवित्री हस्तमयीयं गया सकला ॥ ५५ ॥

अयि जारजात जारैस्त्वज्जननीभर्तुराहृत्य ।
किंच परस्परतोऽपि त्वय्येवेर्षा समर्पिता सकला ॥ ५६ ॥

लक्षणमेव यदीयं मुनिभिः प्रोक्तं पितृद्वेषः ।
तस्य तवैष द्वेषो जारज युक्तो गरीयस्सु ॥ ५७ ॥

तव जारजात जाने पातकजातं फलोन्मुखं जातम् ।
न हि मद्द्वेषो व्यर्थस्तदनर्थस्ते पुरोभावी ॥ ५८ ॥

कलयन्तु तावदेते कुण्डकुलीनं कुलीनं त्वाम् ।
नाविक्रियेत यावद् भवता भवतापकारिणा शिलम् ॥ ५९ ॥

सौजन्यसिन्धुपारे जारज शाखी त्वमन्यादृक् ।
छायापि यस्य तनुते तवत्येभ्योऽपि संतापम् ॥ ६० ॥

आजन्म जारजान्यस्त्वादृग् निन्द्यो न जानतेत्येवम् ।
निन्दायामपरेषामधिकारस्ते समर्पितो विधिना ॥ ६१ ॥

भस्त्राया इव वायुर्जारज योनेस्त्वमुत्पन्नः ।
ज्वालाभिः परिवृण्वन् काष्ठौघं धातुमात्रमाधमासि ॥ ६२ ॥

क्षुभ्येन्न सन्मनस्ते यद्यपि मद्वातु दुर्वचः किन्तु ।
भवति क्षमेह जारज जयिनी याऽशेषरत्नानाम् ॥ ६३ ॥

जारज पारं यातुं पारावारायितस्य चित्तस्य ।
महतामिच्छसि किमहो दुर्वचउडुपं त्वमालम्ब्य ॥ ६४ ॥

जारज यावत् पातकजातमिहास्ते जनैर्भोग्यम् ।
जीवसि तावदतस्ते वृद्धिमहो याति पातकैरायुः ॥ ६५ ॥

अयि जारजात पातकभीतिः कल्या भवादृशां जाने ।
तदपि वदामि किमायुर्नैयमशेषं परद्वेषैः ॥ ६६ ॥

एकस्मिंस्त्वयि जाते जातं दुःखैरिहानेकैः ।
अयि जारजात जाता सपदि समाप्तिः समस्तसौख्यानाम् ॥ ६७ ॥

नूतनमिष्यति पापः पुरातनं मे सुताश्रितं चरितम् ।
कातरतामिति यातस्त्वयि जाते जारजात धातापि ॥ ६८ ॥

कुण्ड तवान्तर्योगो वह्नेर्युक्तस्तथा चास्मिन् ।
ज्वालाजालसमृद्धिर्युक्ता स्नेहस्य योगेन ॥ ६९ ॥

अन्तर्ज्वलनसमृद्धे कुण्ड त्वय्येव कीनाशः ।
हतजगति जुहोति स्नेहेनातिप्लुतान्येव ॥ ७० ॥

कुण्डाः पाण्डुसुतास्ते समयं स्वीयं कृतार्थयन्ति स्म ।
मत्वेतीव किमन्तः कुण्ड कालिं त्वं कृतार्थयसि ॥ ७१ ॥

अयि जारजात पातकभोगं दातुं समस्तलोकेभ्यः ।
सृष्टस्त्वमेव धात्रा सृष्टिर्यथैव नरकाणाम् ॥ ७२ ॥

पातकपुण्यविचारे त्यक्ता चिन्ताद्य चित्रगुप्तेन ।
त्वयि जारजात जीवति पातकमेकं यतो जनैर्भोग्यम् ॥ ७३ ॥

मम जारजात नातः परमपि योगो भवादृशैर्भावी ।
जीविष्यामि कथंचिद् यदि भवदीयादहो योगात् ॥ ७४ ॥

कौक्षेयकप्रयोगश्छिनत्ति कण्ठं कदाचिदेकस्य ।
जारजवचःप्रयोगश्छिनत्ति कण्ठाननेकेषाम् ॥ ७५ ॥

मयि साजात्यकृतोऽपि स्नेहोऽस्यालोक्यते नेति ।
मित्र न कुर्या दुःखं जातिः का जारजातस्य ॥ ७६ ॥

न्यस्ता गुणाः समस्ताः साधौ दोषाश्च जारजे विधिना ।
विधिकृत एव विरोधस्तदेतयोः साधुजारजयोः ॥ ७७ ॥

जारज पारदवत् ते वह्नेरिव योगमासाद्य ।
तत्क्षणमेव प्रलयं प्रयाति लोको निराश्रयीभूतः ॥ ७८ ॥

तव जारजात वचसा न म्रियते चेज्जनः कश्चित् ।
चिरजीविनां स लोकैः सप्तानामष्टमो ज्ञेयः ॥ ७९ ॥

मुख्यं विषं वचस्ते जारज निर्णीतमस्माभिः ।
प्राणान् हरति परेषां दूरादाकर्णितं यदहो ॥ ८० ॥

अशकुनशकुनौ वचने अन्येषां जारजात जायेते ।
अशकुनशकुनफले तु श्रवणाश्रवणे भवद्वचसः ॥ ८१ ॥

जारज तव प्रतिज्ञाऽनृतवचने निर्वहेत् तावत् ।
सत्येऽसत्यपरवधो यावन्नोपस्थितो भवति ॥ ८२ ॥

कुमुदं म्लापय तापय कुण्ड जनं किंच जीवनं क्षपय ।
तदपि त्वया न लभ्यो धिगभाग्यं मित्रगन्धोऽपि ॥ ८३ ॥

जारज यथा जनानां जातो दुःखप्रदस्त्वमसि ।
हा धिक् तवापि न तथा जातो दुःखप्रदः कोऽपि ॥ ८४ ॥

गरलादप्यनलादपि न वज्रपातान्म्रियेतायम् ।
मारयति जारजातं श्रुतिमुपनीता परस्तुतिर्मन्ये ॥ ८५ ॥

जारज वचस्तवेह प्रतीयते चेत् तदाहमपि ।
प्रत्येमि मानवीयं मानं दैनंदिनप्रलये ॥ ८६ ॥

जारज यथाहितस्ते वचस्यनर्थः परो विधिना ।
ह्यपि सतां विवेकस्तथाहितो यत् प्रतीयते नेदम् ॥ ८७ ॥

मिथ्याभिशंसिदोषः कुण्ड कियांस्ते महैनसां कर्तुः ।
गृहभक्षणे कृतमतेः पर्पटवत् स्यात् कपाटं हि ॥ ८८ ॥

भषतु भवानविचारं जारज लब्धुं शुनः साम्यम् ।
त्वयि वद कुत्र तदीयं पश्चात्स्नेहप्रदर्शनं लभ्यम् ॥ ८९ ॥

कर्तुं परोपकारं जारज जानासि नैव त्वम् ।
मा कुरु परापकारं सुकरं तावन्न ते तदपि ॥ ९० ॥

कियतीं करोमि कीर्तिं कुलदीपः कुण्ड जानासि ।
किंतु ज्वलति भवत्तः कुलेमतन्नोज्वलीभवति ॥ ९१ ॥

कार्याकार्यविचारत्यागादुद्भूज्जनुर्यस्य ।
कार्याकार्यविचारः कत्यस्ते जारजात स्यात् ॥ ९२ ॥

दुग्धेऽम्लताविरास्ते दिनद्वयं तक्रसंयोगात् ।
भवति तु सतां मनोऽम्लं दर्शनमात्रेण जारजातस्य ॥ ९३ ॥

परनिन्दया भवित्री जारज नैव प्रशंसा ते ।
कार्यगुणाः कारणगुणानपेक्षा निरीक्ष्यन्ते ॥ ९४ ॥

जारज सार्वजनीना जन्मप्रभृति प्रतिष्ठा ते ।
अस्माभिस्तु क्षतायामक्षतायां वा फलं किमस्यां ते ॥ ९५ ॥

परदुःखैरास सुखितः परसुखमालोक्य दुःखितो यदसि ।
त्वयि जारजात लब्धं साधुजनाद् भेदकं तदिदम् ॥ ९६ ॥

किमहो कुण्ड करोषि स्तुतिमपरस्याथवा ज्ञातम् ।
अनृतं वदति भवानिति निश्चयभाजां सभा ह्येषा ॥ ९७ ॥

जारज कृता त्वया चेत् स्तुतिः कदाचिन्न सा स्तुतिर्भवति ।
नालोक्यते तवास्था निन्दायां वा स्तुतौ वा यत् ॥ ९८ ॥

वितथं वचोऽभिमानो वितथो ज्ञानं च ते वितथम् ।
तव जारजात जाराज्जातं वपुरेतदेव वितथं न ॥ ९९ ॥

अयि जारजात जाने नानेनैवानुमानेन ।
सर्वत्राप्यफलस्ते स्नेहो मयि किं फलं फलति ॥ १०० ॥

अभवद् भूतावेशोऽपायि सुराऽभक्षि वा भङ्गा ।
यत्किंचिदेव जल्पसि जारज केनान्यथा नो चेत् ॥ १०१ ॥

वक्रो विषेण युक्तः पश्चात् पुरतः पुनः साधुः ।
जारज वृश्चिकवत् त्वं स्नेहं सोढुं न शक्नोषि ॥ १०२ ॥

संसारः क्षणिकोऽसावभिमतमेतन्मतं येषाम् ।
जारप्रकृतिरियं ते तनुते साहाय्यमेतेषाम् ॥ १०३ ॥

पश्यत जनमुपवेश्य स्वसंगतौ नावि नाविकः कुण्डः ।
सौजन्यसिन्धुपारं गमयति सुकृती विनावतरम् ॥ १०४ ॥

साधुजनस्य चरित्रं विलोक्य सर्वैर्विनिन्द्योऽहम् ।
मत्वेतीव द्वेषः साधुषु जातोऽस्य जारजातस्य ॥ १०५ ॥

अयि जारजात जगति प्रभवति कस्ते तुलां कर्तुम् ।
सर्वज्ञंमन्य यतः शिवोऽपि तुल्यो न ते जाने ॥ १०६ ॥

नैष मदीयः क्लेशो मतिमद्भिः क्लेष एव विज्ञेयः ।
तादृशचरितनिषेधं बोधयितुं यः प्रभुः परितः ॥ १०७ ॥

शुक्लजनार्दनपुत्रो वत्साचार्यस्य दौहित्रः ।
पठितालंकृतिशास्त्रो भट्टश्रीमण्डनच्छात्रः ॥ १०८ ॥

हीराभिधानपातिव्रतमहसि प्राप्तनिजजन्मा ।
कविनीलकण्ठशर्मा निर्मितिमेनां विनिर्ममे शैवः ॥ १०९ ॥

मुनिनिधिहिकांशुमहीधरमहीमितेऽब्दे व्यतिक्रान्ते ।
नृपसाहसाङ्कसमयाद् व्यरचीदं नीलकण्ठेन ॥ ११० ॥

इति कविनीलकण्ठविरचितं **जारजातशतम्** संपूर्णम् ॥

श्लोकाः	संख्या
अन्तर्ज्वलनसमृद्धे	७०
* अन्यस्मै कविता मे	७
अभवद् भूतावेशो	१०१
अयि जारजात जगति	१०६
अयि जारजात जाताः	५२
अयि जारजात जाने ना०	१००
अयि जारजात जाने मा०	५०
अयि जारजात जारैः	५६
अयि जारजात पातकभी०	६६
अयि जारजात पातकभो०	७२
अयि जारजात भवतः	५५
अशकुनशकुनौ वचने	८१
अस्माकं कवितेयं	५
* आघातैरतिमात्रं	४५
आजन्म जारजान्यः	६१
एकस्मिंस्त्वयि जाते	६७
कर्तुं परोपकारं	९०
कलयन्तु तावदेते	५९
कः संकोचः कार्ये	५३
कार्याकार्यविचार०	९२
किमहो कुण्ड करोषि	९७
कियतीं करोषि कीर्तिं	९१
कुण्ड तवान्तर्योगो	६९
कुण्ड सपिण्डेऽपि मृते	३०
कुण्डाः पाण्डुसुतास्ते	७१
कुण्डेयं कविता मे	३
कुमुदं म्लापय तापय	८३
कौक्षेयकप्रयोगः	७५
क्षणमात्रं तव मात्रा	३२
क्षुभ्येन्न सन्मनस्ते	६३
गरलादप्यनलादपि	८५
जन्म तवाभूज्जारात्	५१
जातु यमेनाज्ञप्तः	२९
जारज कृता त्वया चेत्	९८
जारज जननीदोषैः	४०
* जारज जननीयं ते	४२
* जारजजननीयोनि०	४३
* जारजजननीयोनौ	३३
जारज तदा तव स्यात्	४८
जारज तव प्रतिज्ञा	८२
जारज ना रजासि त्वन्मातरि	३९
जारज पारं यातुं	६४
जारज पारदवत् ते	७८
जारजबर्बूरवनं	४४
जारज मत्कवितायाः	४
जारज यथा जनानां	८४
जारज यथा हितस्ते	८७
जारज यदपि महालय०	५४
जातज यावत् पातक०	६५
जारज वचस्तवेह	८६

Note :— The Slokas marked with an asterik have been omitted from the text as being out of taste,

श्लोकाः	संख्या
जारज सार्वजनीना	९५
तव जारजात जाने	५८
तव जारजात माता	३७
तव जारजात वचसा	७९
तातेति लालपन्तं	३८
त्वन्मातेव मदीया	६
दुग्धेऽम्लताविरास्ते	९३
* नन्दिनिबद्धां शास्त्रे	३४
नानाप्रकारमादरं	४७
* निन्येऽनेकैर्जारैः	३१
नूतनमिष्यति पापः	६८
नैष मदीयः क्लेषः	१०७
न्यस्ता गुणाः समस्ताः	७७
परदुःखैरसि सुखितः	९६
परनिन्दया भवित्री	९४
पश्यत जनमुपवेश्य	१०४
पातकपुण्यविचारे	७३
पातिव्रत्यमधास्यत्	२८उ.
पुरुषः स नावशिष्टः	४६
* बह्वीनां पतिरेकः	३५
भषतु भवानविचारं	८९
भस्त्राया इव वायुः	६२
* मत्कवितामपरस्मै	८
मम जारजात नातः	७४
मयि साजात्यकृतोऽपि	७६
मिथ्याभिषंसिदोषः	८८
मुख्यं विषं वचस्ते	८०
मुनिमिहिकांशुमहीधर०	११०
यः कश्चनास्मदीये	५
यः परकीयं काव्यं	२
यैर्माता मिलिता ते	३६
* रुद्रेर्ष्ययैव जारज	४९
लक्षणमेव यदीयं	५७
वक्रो विषेण युक्तः	१०२
वितथं वचोऽभिमानः	९९
शुक्लजनार्दनपुत्रः	१०८
* श्वभिरिव पुंभिर्बुहुभिः	४१
संसारः क्षणिकोऽसौ	१०३
सर्वत्र यस्य वंशे	९ पू.
साधुजनस्य चरित्रं	१०५
सौजन्यसिन्धुपारे	६०
हीराभिधानपातिव्रत०	१०९

OUR EXCHANGES.

1. The Indian P. E. N. Bombay.
2. The Divine Life, Sivananda Nagar, Rishikesh, U. P.
3. Mysore Information Bulletin, Govt. of Mysore.
4. Madras Information, Govt. of Madras.
5. The Journal of Oriental Research, Madras.
6. The Journal of University of Bombay.
7. Bulletin of the Govt. Oriental Manuscripts Library, Madras.
8. American Newsfile of the U. S. Information Service.
9. The Journal of the Travancore University Oriental M S S. Library.
10. Agra University Journal of Research, Agra.
11. Tirumalai Tirupathi Devasthanam—Monthly Bulletin.
12. Commonwealth Today.
13. Fortnightly Review of News and Events of the British Information Service.
14. Journal of the Annamalai University, Annamalainagar.
15. The Adyar Library Bulletin, Adyar, Madras—20.
16. Journal of Sri Venkateswara Oriental Institute, Tirupathi.
17. Journal of the Oriental Institute, Baroda.
18. Britain Today.
19. Annals of the B. O. R. Institute, Poona—4.
20. Sen Tamil. (Tamil) Madurai Tamil Sangam, Madurai.
21. Gnanasambandam. (Tamil) Dharmapuram.
22. Tamil Pozil. (Tamil) Karanthai Tamil Sangam, Tanjore.
23. Vaidya Chandrika. (Tamil) Teppakulam, Trichy.
24. Eeelakesari, Ceylon. (Tamil)
25. American Reporter—Tamil and English Editions.
26. Vijayavani—(Telugu) Vijayawada.
27. Kinnera. (Telugu Monthly) 16, Jones St., Madras—1.
28. Traimasik—Bharata Ithihasa Samshodhak Mandal, Poona.
29. Samshodhak, Rajwade Samsodhan Mandir, Dhulia.
30. Quarterly Journal of the Mythic Society, Bangalore.
31. Jaina Siddhantha Bhaskar & Antiquary, Arrah (Bihar).
32. Udyana Patrika, Tiruvaiyaru, Tanjore Dt.
33. UNESCO Bulletin for Libraries, 19, Avenue Klēber, Paris—16 e, France.
34. Dharma Chakram, Sri Rama Krishna Tapovanam.
35. Matru Seva. (Telugu Weekly) Tondiarpet, Madras—21.
36. Sutantiran. (Tamil Weekly) Colombo.
37. Bulletin of the Ramakrishna Mission Institute of Culture, Calcutta.

38. The Indo-Asian Culture, Pataudi House, New Delhi—1.
39. Sri Ramakrishna Vijayam, Sri Ramakrishna Matam, Madras—4.
40. News Bulletin, Embassy of the People's Republic of China, New Delhi.
41. News from Yugoslavia, Yugoslav Embassy, 13, Sundaranagar, New Delhi.
42. SOCIĒTĒ ASIATIQUE, 1, Rue de Seine, PARIS. (Vle)
43. Devasthana Patrika, Srirangam.
44. Astrological Magazine, BANGALORE.
45. Kurukshetra, Delhi—8.

PRINTED AT THE SRI VANI VILAS PRESS, SRIRANGAM ; 3—7—55.